औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः ।
सामान्यार्थस्तस्य चासञ्जनेऽस्मिन् ङित्कार्यं ते श्यां प्रसक्तं स दोषः ।।

ङित्त्वे विद्याद् वर्णनिर्देशमात्रं वर्णे यत् स्यात् तच्च विद्यात् तदादौ ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् (म.भा.३.२४७) ।।

नपुंसकाच्च । (१९/३१०)

नपुंसकादङ्गादुत्तरस्य औङः[1] शी इत्ययमादेशो भवति । कुण्डे तिष्ठतः । कुण्डे पश्य । यस्येति (६.४.१४८/३११) लोपः प्राप्तः ।

[८१६] श्यां प्रतिषेधो वक्तव्यः ।

इति न भवति । दधिनी । मधुनी । त्रपुणी । जतुनी ।।

जश्शसोः शिः । (२०/३१२)

नपुंसकादङ्गादुत्तरयोः जश्शसोः[2] शि इत्ययमादेशो भवन्ति । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य । दधीनि । मधूनि । त्रपूणि । जतूनि । जसा सहचरितस्य शसो ग्रहणादिह न भवति, कुण्डशो ददाति, वनशः प्रविशन्ति इति ।।

अष्टाभ्य औश् । (२१/२८७)

अष्टाभ्यः इति कृताकारो[3]ऽष्टन्शब्दो गृह्यते । तस्मादुत्तरयोः [4]जश्शसोः औश् इत्यादेशो भवति । अष्टौ तिष्ठन्ति । अष्टौ पश्य । [5]कृताकारस्य ग्रहणं किम् ? अष्ट तिष्ठन्ति । अष्ट पश्य । एतदेव[6] कृतात्वस्य ग्रहणं ज्ञापकम् 'अष्टन आ विभक्तौ' (७.२.८४/३७१) इत्यात्वविकल्पस्य । 'षड्भ्यो लुक्' (७.१.२२/२६१) इत्यस्यायमपवादः, नाप्राप्ते[7] तस्मिन्निदमारभ्यते । यस्तु 'सुपो धातुप्रातिपदिकयोः' (२.४.७१/६५०) इति, तस्मिन् प्राप्ते चाप्राप्ते च इति स न बाध्यते, अष्टपुत्रः, अष्टभार्यः इति । तदन्तग्रहणमत्रेष्यते । परमाष्टौ । उत्तमाष्टौ । प्रियाष्टानः इत्यत्रात्वस्य अभावाद् औश्त्वं न भवति ।।

षड्भ्यो लुक् । (२२/२६१)

षट्सञ्ज्ञकेभ्य उत्तरयोः जश्शसोर्लुक् भवति । षट् तिष्ठन्ति । षट् पश्य । पञ्च । सप्त । नव । दश । षट्प्रधानात् तदन्तादपि[8] भवति । [9]उत्तमषट् । यत्र तूपसर्जनं षट् ततो न भवति, प्रियषषः, प्रियपञ्चानः इति ।।

---

1. स्थाने इत्यधिकम् क. 2. स्थाने इत्यधिकम् ड. ह. 3. अष्टशब्दो ब. ड. 4. जसिशसोः क.
5. कृताकारस्य ग्रहणमिह भवति ह. 6. एव नास्ति क. 7. तु एतस्मिन् इ. 8. जसिशसोः लुक् इत्यधिकम् क.ह.
9. उत्तमपञ्च ड.